National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2024;** 1(57): 227-228
© 2024 NJHSR
www.sanskritarticle.com

**Giriraja Upadhyaya**
Research Scholar,
Department of Dvaita Vedanta,
National Sanskrit University,
Tirupathi (A.P)

**Correspondence:**
**Giriraja Upadhyaya**
Research Scholar,
Department of Dvaita Vedanta,
National Sanskrit University,
Tirupathi (A.P)

# द्वैतमतरीत्या आगमप्रामाण्यम्

**Giriraja Upadhyaya**

**लेखनसारः**

'मानाधीना मेयसिद्धिः' इत्युक्तदिशा प्रमाणैरेव प्रमेयाणां यथार्थज्ञानं लभ्यते।प्र इत्युपसर्गपूर्वकस्य माङ् माने इति धातोः 'भावे'[1] इत्यधिकारसूत्रव्याप्तिगतस्य 'करणाधिकरणयोश्च'[2] इति सूत्रेण'ल्युट्' प्रत्यये सति प्रमाणशब्दनिष्पत्तिर्भवति ।

अनेकाः दार्शनिकाः बहुविधप्रमाणान्यङ्गीकुर्वन्ति। तस्य लक्षणकथनेपि भेदः दृश्यते ।अस्माभिः द्वैतिभः अर्थापत्यादीनि प्रमाणत्रयेषु अन्तर्भूतानि इत्यङ्गीक्रियते ।

अत्र द्वैतमतरीत्या प्रमाणलक्षणं, तस्य विभागः प्रदर्श्यते। विशेषतः आगमस्य निरूपणम्, आगमविभागाः, अस्माभिः अङ्गीकृतानाम् प्रमाणभूतानाम् आगमनाम् निर्देशः क्रियते ।

**पीठिका**

द्वैतमतरीत्या प्रमाणसामान्यलक्षणं 'यथार्थं प्रमाणम्'[3] इति। अत्र यथाशब्दः अनतिक्रमवाच्यः। अर्थशब्दश्च अर्यते इति व्युत्पत्त्या ज्ञेयवाची। ज्ञेयमनतिक्रम्य वर्तमानं यथावस्थितमेव ज्ञेयं यद्विषयीकरोति नान्यथा तत्प्रमाणम् इत्यर्थः[4]। केवलप्रमाणम् , अनुप्रमाणं चेति द्विविधम् प्रमाणम्। तत्र यथार्थज्ञानं केवलप्रमाणम्। ईश्वरज्ञानं, लक्ष्मीज्ञानं, योगिज्ञानम्, अयोगिज्ञानं चेति तच्चतुर्धा भिद्यते।यथार्थज्ञान-साधनमनुप्रमाणम्[5]।तत्त्रिविधम्। प्रत्यक्षम् , अनुमानम्, आगमश्चेति। तत्र निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षम्। निर्दोषोपपत्तिरनुमानम्। निर्दोषः शब्दः आगमः। इति त्रयाणामनुप्रमाणानां लक्षणं प्रमाणपद्धतौ निरूपितमस्ति।

**निर्दोषः शब्दः आगमः**

निरभिधेयत्वेनअन्वयाभावेन वा अबोधकत्वं, विपरीतबोधकत्वं, ज्ञातज्ञापकत्वम्, अप्रयोजनत्वम्, अनभिमतप्रयोजनत्वम्, अशक्यसाधनप्रतपादनं, लघूपाये सति गुरूपायोपदेशनमित्यादोषरहितः शब्दः आगमः। स च द्विविधः।अपौरुषेयः , पौरुषेयश्चेति।अपौरुषेयो वेदः , अन्यः पौरुषेयः । प्रामाण्यभूतानाम् आगमानाम् सङ्ग्रहः पराणादिषु दश्यते ।

**ऋगाद्याः भारतं चैव पञ्चरात्रमथाखिलम्।**
**मूलरामायणं चैव पुराणं चैतदात्मकम्॥**
**ये चानुयायिनस्त्वेषां सर्वे ते च सदागमाः।**
**दुरागमास्तदन्ये ये तैर्न ज्ञेयो जनार्दनः ॥**
**ज्ञेय एतैस्सदायुक्तैर्भक्तिमद्भिस्सुनुष्ठितैः।**
**न च केवलतर्केण नाक्षजेन न केनचित्।**
**केवलागमविज्ञेयो भक्तैरेव न चान्यथा[6]॥** इति

ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः, महाभारतं , अखिलं पञ्चरात्रं, मूलरामायणं, पुराणं , एतेषां अनुयायिनः अन्याः आगमाः सदागमाः। ते एव प्रमाणभूताः। एतैरेव भगवान् ज्ञेयः। केवलम् अनुमानेन वा प्रत्यक्षेण वा ज्ञेयो न भवति । सः केवलागमज्ञेयः इति निरूप्यते।

**वेदाः**

**ते वेदाः ऋग्यजुस्सामाथर्वणाः श्रीहरेर्वशाः**

**चत्वारोपि पृथग्जात्या अनन्ता दोषवर्जिताः।**[7]

इति ऋग्यजुस्सामाथर्वभेदेन व्यवस्थितानाम् वेदानाम् आनन्त्यं ,दोषशून्यत्वं च प्रतिपादितम्।अपि च अनन्तकालमारभ्य ईषद्व्यत्यासवर्जिताः।[8] इति सर्वदा एकरूपत्वमपि प्रतिपादितम्।

**गुणाख्यानपरा विष्णोः शब्ददोषविवर्जिताः ।**

**ज्ञातज्ञापकता तेषु विपरीतार्थवक्तृत॥**

**अस्पष्टत्वादयस्तेषु वाददोषाः न सन्त्यलम्।**[9]

इति सर्वे वेदाः विष्णुगुणवाचकाः, अपि च शब्ददोषविवर्जिताः इति प्रतिपादितम्।

**'लये लक्ष्मीवशाः सृष्टौ ब्रह्माद्यैरभिमानिभिः।**
**रक्षिता प्रलये सृष्टावेकरूपा भवन्ति हि॥**
**अनन्तानन्तसङ्ख्याताः विष्णोः ज्ञाने च साधकाः।**
**सर्वदेशगतानन्ताः कण्ठस्थास्तस्य शार्ङ्गिणः॥**
**कण्ठेनोद्गीयमानास्ते जीवानां योग्यतावशात्।**
**तत्तत्स्वरूपविज्ञानव्यञ्जकाः श्रीहरीच्छया॥**
**वृत्तिज्ञानोत्पादशौण्डा अथाज्ञानामबोधकाः।**
**शब्दरूपास्साक्षियुक्तमनःश्रोत्रैकगोचराः॥**
**सर्वशब्दात्मकहरेः बिम्बस्य प्रतिबिम्बकाः'**[10]

लये लक्ष्मीवशभूताः वेदाः सृष्टिकाले ब्रह्मादिदेवताद्वारा व्यक्तो भवति। लयकाले , सृष्टिकाले च वेदाः एकरूपतया भवन्ति। वेदाः अनन्ताः। भगवज्ज्ञानसाधकाः। सर्वदेशगताः, सदा विष्णुबुद्धि-स्थाः, योग्यतानुसारेण जीवानाम् भगवद्विज्ञानव्यञ्जकाः भवन्ति। अज्ञानां तु वेदज्ञानं दष्करम्। सर्वशब्दवाच्यस्य बिम्बभूतस्य हरेः प्रतिबिम्बकाः इति वर्णिताः। को ह्यन्यः पुण्डरीकाक्षान्महाभारत-कृद्भवेदिति भगवत्प्रणीतत्वात् भारतस्य प्रामाण्यं सिद्ध्यति।

अत्र पञ्चरात्रस्यापि अखिलस्य ग्रहणं कृतम्।अतः तदपि प्रमाणम् इत्यर्थः ।बहवः संहिताग्रन्थाः पञ्चरात्रान्तर्गताः अधुना नोपलभ्यन्ते । केचन प्रकाशिताः । केचन अप्रकाशिताः ।किन्तु संहितानां नामधेयानि तत्र तत्र समुपलभ्यन्ते ।पाद्मसंहिता तस्याः नामधेयानि एवं निरूपयति ।

**शतमेकमथाष्टौ च पुराणे कण्व शुशृम।**

**नामधेयानि चैतेषां श्रूयतां कथ्यते मया॥**[11]

**पाद्मं पद्मोद्भवं मायावैभवं नलकूबरम्।**
**त्रैलोक्यमोहनं विष्णुतिलकं परमाह्वयम्॥**
**नारदीयं धनदीयं वासिष्ठं पौष्कराह्वयम्।**
**सनत्कुमारं सनकं सत्याख्यं विश्वसम्हिता॥**
**अनन्ताख्यं महीप्रश्नं श्रीप्रश्नं पुरुषोत्तमम् ।**
**माहेन्द्रसम्हिता पञ्चप्रश्नाख्यं तत्त्वसागरम्॥**
**वागीशं सात्त्वतं चैव द्रविणं श्रीकराह्वयम्।**
**सांवर्तं विष्णुसद्भावं सिद्धान्तं विष्णुपूर्वकम्॥**
**विष्णुतन्त्रं च कौमारं तथाहिर्बुध्न्यसम्हिता।**
**विष्णुवैभाविकं सौरं सौम्यमीश्वरसम्हिता॥**
**अनन्ताख्यं भागवतं जयाख्यं मूलसम्हिता।**
**पुष्टितन्त्रं शौनकीयं मारीचं दक्षसम्हिता॥**
**औपेन्द्रं योगहृदयं हारीतं पारमेश्वरम्।**
**आत्रेयं मान्दरं विष्वक्सेनमौशनसाह्वयम्॥**
**वैखानसं विहङ्गेन्द्रं भार्गवं परपूरुषम्।**
**याज्ञवल्क्यं गौतमीयं पौलस्त्यं शाकलाह्वयम्॥**
**ज्ञानार्णवं जामदग्न्यं याम्यं नारायणाख्यकम्।**
**पाराशर्यं च जाबालं कपिलं वामनाह्वयम्॥**
**जयोत्तरं बार्हस्पत्यं जैमिनं सात्त्वताह्वयम्।**
**कात्यायनीयं वाल्मीकं औपगायनसम्हिता॥**
**हैरण्यगर्भमागस्त्यं काण्वं बोधायनाह्वयम्।**
**भारद्वाजं नारसिम्हं गार्ग्यमुत्तरपूर्वकम्॥**
**शातातपं चाङ्गिरसं काश्यपं पैङ्गलाह्वयम्।**
**त्रैलोक्यविजयं योगं वायवीयं च वारुणम्॥**
**कृष्णं चाम्बरमाग्नेयं मार्कण्डेयस्य सङ्ग्रहः।**
**महासनत्कुमाराख्यं व्यासाख्यं विष्णुसम्हिता॥**
**मार्कण्डेयं पारिषदं ब्रम्हनारदसम्हिता।**
**संवादं शुकरुद्राभ्यामुमामाहेश्वराह्वयम्॥**
**दत्तात्रेयं च शर्वाख्यं वाराहमिहिराह्वयम्।**
**सङ्कर्षणाख्यं प्रद्युम्नं वामनं कल्किराघवौ॥**
**प्राचेतसाख्यमित्येके शतमष्टोत्तरं स्मृतम्।**
**एतानि तन्त्रनामानि मयोक्तानि महामते"॥** इति॥

अपि च अन्याः अपि संहिताः तत्र तत्र निर्दिश्यमानाः बहवः सन्ति ।

**मूलरामायणम्**

मूलरामायणमपि इदानीं नोपलभ्यते ।तस्य उल्लेखः सर्वमूल् कृतः ।

**मद्वयं भद्वयं चैव ब्रत्रयं व्रचतुष्टयम्।**

**अनापलिङ्गकूस्कानि पुराणानि विदो विदुः ॥**[12]

मत्स्य-मार्कण्डेय-भागवत-भविष्य-ब्रह्म-ब्रह्माण्ड-ब्रह्मवैवर्त-वायु-वराह-वामन-विष्णु-अग्नि-नारद-पद्म-लिङ्गभेदेन अष्टादश पुराणानि समुपलभ्यन्ते ।

अपि च ये वेदानुयायिनः शब्दाः सन्ति ते सर्वेपि प्रमाणभूताः।

**ग्रन्थसूची**


प्रमाणपद्धतिः -शंकरनारायण अडिगः - पूर्णप्रज्ञसंशोधनमन्दिरम्
विष्णुतत्त्वविनिर्णयः - के. टि. पांडुरंगि -द्वैतवेदान्त फौण्डेशन्
प्रकाशसंहिता - उदयकुमारः - सोदे मठः
पाद्मसंहिता - सम्पत्- पञ्चरात्रसंशोधनपरिषत्


**संदर्भ:-**

1. अष्टाध्यायी ३.३.१८
2. अष्टाध्यायी ३.३.११७
3. प्रमाणपद्धतिः
4. प्रमाणपद्धतिः
5. प्रमाणपद्धतिः
6. ब्रह्माण्डपुराणम् विष्णुतत्त्वनिर्णयोद्धृतम्
7. प्रकाशसंहिता.अ.१.६२
8. प्रकाशसंहिता.अ.१.६४
9. प्रकाशसंहिताअ.१.६४-६५
10. प्रकाशसंहिता.अ.१.६२-७१
11. पाद्मसम्हिता१(९८-११६)
12. देवीभागवतम् १.३.२१